# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## ॥अथ द्वितीय काण्डे तृतीयः प्रश्नः॥

हरिः ओम्॥ आदित्येभ्यो भुवद्वद्भ्यश्चरुं निर्वपेद्भूतिकाम आदित्या वा एतं भूत्यै प्रति नुदन्ते योऽलं भूत्यै सन्भूतिं न प्राप्नोत्यादित्यानेव भुवद्वतः स्वेन भागधेयेनोप धावति त एवैनं भूतिं गमयन्ति भवत्येवाऽऽदित्येभ्यो धारयद्वद्भ्यश्चरुं निर्वपेदपरुद्धो वाऽपरुध्यमानो वाऽऽदित्या वा अपरोद्धार आदित्या अवगमयितार आदित्यानेव धारयद्वत- [१] स्वेन भागधेयेनोप धावति त एवैनं विशि दाधत्यनपरुध्यो भवत्यदितेऽनु मन्यस्वेत्यपरुध्यमानोऽस्य पदमा ददीतेयं वा अदितिरियमेवाऽस्मै राज्यमनु मन्यते सत्याऽऽशीरित्याह सत्याऽऽमेवाशिषं कुरुत इह मन इत्याह प्रजा एवाऽस्मै समनसः करोत्युप प्रेत मरुतः [२] सुदानव एना विश्पतिनाऽभ्यमुग्ं राजानमित्याह मारुती वै विड्ज्येष्ठो विश्पतिर्विशैवैनग्ं राष्ट्रेण समर्धयति यः परस्ताद्ग्राम्यवादी स्यात्तस्य गृहाद्व्रीहीना हरेच्छुक्लाग् श्च कृष्णाग् श्च वि चिनुयाद्ये शुल्काः स्युस्तमादित्यं चरुं निर्वपेदादित्या वै देवतया विड्विशमेवाव गच्छ- [३] त्यवगताऽस्य विडनवगतग्ं राष्ट्रमित्याहुर्ये कृष्णाः स्युस्तं वारुणं चरुं निर्वपेद्वारुणं वै राष्ट्रमुभे एव विशं च राष्ट्रं चाऽव गच्छति यदि नाऽवगच्छेदिममहमादित्येभ्यो भागं निर्वपाम्याऽमुष्मादमुष्यै विशोऽवगन्तोरिति निर्वपेदादित्या एवैनं भागधेयं प्रेप्सन्तो विशमव [४] गमयन्ति यदि नाऽवगच्छेदाश्वत्थान्मयूखान्थ्सप्त मध्यमेषायामुप

हन्यादिदमहमादित्यान्बध्नाम्याऽमुष्मादमुष्यै विशोऽवगन्तोरित्यादित्या एवैनं बद्धवीरा विशमव गमयन्ति यदि नाऽवगच्छेदेतमेवाऽऽदित्यं चरुं निर्वपेदिध्मेऽपि मयूखान्थ्सं नह्येदनपरुध्यमेवाऽव गच्छत्याश्वत्था भवन्ति मरुतां वा एतदोजो यदश्वत्थ ओजसैव विशमव गच्छति सप्त भवन्ति सप्तगणा वै मरुतो गणश एव विशमव गच्छति॥[५]

*धारयद्वतो मरुतो गच्छति विशमवैतदष्टादश च||2.3.1||*

देवा वै मृत्योरबिभयुस्ते प्रजापतिमुपाऽधावन्तेभ्य एतां प्राजापत्याग्ं शतकृष्णलां निरवपत्तयैवैष्वमृतमदधाद्यो मृत्योर्बिभीयात्तस्मा एतां प्राजापत्याग्ं शतकृष्णलां निर्वपेत्प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवाऽस्मिन्नायुर्दधाति सर्वमायुरेति शतकृष्णला भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये [६] प्रति तिष्ठति घृते भवत्यायुर्वै घृतममृतग्ं हिरण्यमायुश्चैवाऽस्मा अमृतं च समीची दधाति चत्वारिचत्वारि कृष्णलान्यव द्यति चतुरवत्तस्याऽऽप्त्या एकधा ब्रह्मण उप हरत्येकधैव यजमान आयुर्दधात्यसावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन्तस्मा एतग्ं सौर्यं चरुं निरवपन्तेनैवाऽस्मि– [७] न्नुचमदधुर्यो ब्रह्मवर्चसकामः स्यात्तस्मा एतग्ं सौर्यं चरुं निर्वपेदमुमेवाऽऽदित्यग्ग् स्वेन भागधेयेनोप धावति स एवाऽस्मिन्ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवत्युभयतो रुक्मौ भवत उभयत एवाऽस्मिन्नुचं दधाति प्रयाजेप्रयाजे कृष्णलं जुहोति दिग्भ्य एवाऽस्मै ब्रह्मवर्चसमव रुन्ध आग्नेयमष्टाकपालं निर्वपेथ्सावित्रं द्वादशकपालं भूम्यै [८] चरुं यः कामयेत हिरण्यं विन्देय हिरण्यं मोप नमेदिति यदाग्नेयो भवत्याग्नेयं वै हिरण्यं यस्यैव हिरण्यं तेनैवैनद्विन्दते सावित्रो भवति सवितृप्रसूत एवैनद्विन्दते भूम्यै

चरुर्भवत्यस्यामेवैनद्विन्दत उपैनग्ं हिरण्यं नमति वि वा एष इन्द्रियेण वीर्येणर्ध्यते यो हिरण्यं विन्दत एता [९] मेव निर्वपेद्धिरण्यं वित्त्वा नेन्द्रियेण वीर्येण व्यृध्यत एतामेव निर्वपेद्यस्य हिरण्यं नश्येद्यदाग्नेयो भवत्याग्नेयं वै हिरण्यं यस्यैव हिरण्यं तेनैवैनद्विन्दति सावित्रो भवति सवितृप्रसूत एवैनद्विन्दति भूम्यै चरुर्भवत्यस्यां वा एतन्नश्यति यन्नश्यत्यस्यामेवैनद्विन्दतीन्द्र- [१०] स्त्वष्टुः सोममभीषहाऽपिबथ्स विष्वङ्व्यार्छथ्स इन्द्रियेण सोमपीथेन व्यार्ध्यत स यदूर्ध्वमुदवमीत्ते श्यामाका अभवन्थ्स प्रजापतिमुपाऽधावत्तस्मा एतग्ं सोमेन्द्रग्ग् श्यामाकं चरुम्निरवपत्तेनैवाऽस्मिन्निन्द्रियग्ं सोमपीथमदधाद्वि वा एष इन्द्रियेण सोमपीथेनर्ध्यते यः सोमं वमिति यः सोमवामी स्यात्तस्मा [११] एतग्ं सोमेन्द्रग्ग् श्यामाकं चरुं निर्वपेथ्सोमं चैवेन्द्रं च स्वेन भागधेयेनोप धावति तावेवाऽस्मिन्निन्द्रियग्ं सोमपीथं धत्तो नेन्द्रियेण सोमपीथेन व्यृध्यते यथ्सौम्यो भवति सोमपीथमेवाव रुन्धे यदैन्द्रो भवतीन्द्रियं वै सोमपीथ इन्द्रियमेव सोमपीथमव रुन्धे श्यामाको भवत्येष वाव स सोमः [१२] साक्षादेव सोमपीथमव रुन्धेऽग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय प्रदात्रे पुरोडाशमेकादशकपालं पशुकामोऽग्निरेवाऽस्मै पशून् प्र जनयति वृद्धानिन्द्रः प्र यच्छति दधि मधु घृतमापो धाना भवन्त्येतद्वै पशूनाग्ं रूपग्ं रूपेणैव पशूनव रुन्धे पञ्चगृहीतं भवति पाङ्क्ता हि पशवो बहुरूपं भवति बहुरूपा हि पशवः [१३] समृध्यै प्राजापत्यं भवति प्राजापत्या वै पशवः प्रजापतिरेवाऽस्मै पशून्प्र जनयत्यात्मा वै पुरुषस्य मधु यन्मध्वग्नौ जुहोत्यात्मानमेव तद्यजमानोऽग्नौ प्र दधाति पङ्क्त्यौ याज्यानुवाक्ये भवतः पाङ्क्तः पुरुषः पाङ्क्ताः पशव आत्मानमेव मृत्योर्निष्क्रीय पशूनव रुन्धे॥[१४]

*इन्द्रियꣳअस्मिन् भूम्या एतामिन्द्रः स्यात्तस्मै सोमो बहुरूपा हि पशव एकचत्वारिꣳशच्च ॥2.3.2॥*

देवा वै सत्त्रमासतर्धिपरिमितं यशस्कामास्तेषाꣳ सोमꣳ राजानं यश आर्छथ्स गिरिमुदैत्तमग्निरनूदैत्तावग्नीषोमौ समभवतां ताविन्द्रो यज्ञविभ्रष्ठोऽनु परैत्तावब्रवीद्याजयतं मेति तस्मा एतामिष्टिं निरवपतामाग्नेयमष्टाकपालमैन्द्रमेकादशकपालꣳ सौम्यं चरुं तयैवाऽस्मिन्तेज [१५] इन्द्रियं ब्रह्मवर्चसमधत्तां यो यज्ञविभ्रष्टः स्यात्तस्मा एता मिष्टिं निर्वपेदाग्नेयमष्टाकपालमैन्द्रमेकादशकपालꣳ सौम्यं चरुं यदाग्नेयो भवति तेज एवाऽस्मिन्तेन दधाति यदैन्द्रो भवतीन्द्रियमेवाऽस्मिन्तेन दधाति यथ्सौम्यो ब्रह्मवर्चसं तेनाऽऽग्नेयस्य च सौम्यस्य चैन्द्रे समाश्लेषयेत्तेजश्चैवाऽस्मिन्ब्रह्मवर्चसं च समीची [१६] दधात्यग्नीषोमीयमेकादशकपालं निर्वपेद्यं कामो नोपनमेदाग्नेयो वै ब्राह्मणः स सोमं पिबति स्वामेव देवताग् स्वेन भागधेयेनोप धावति सैवैनं कामेन समर्धयत्युपैनं कामो नमत्यग्नीषोमीयमष्टाकपालं निर्वपेद्ब्रह्मवर्चसकामोऽग्नीषोमावेव स्वेन भागधेयेनोप धावति तावेवाऽस्मिन्ब्रह्मवर्चसं धत्तो ब्रह्मवर्चस्येव [१७] भवति यदष्टाकपालस्तेनाऽऽग्नेयो यच्छयामाकस्तेन सौम्यः समृद्ध्यै सोमाय वाजिने श्यामाकं चरुं निर्वपेद्यः क्लैव्याद्बिभीयादृतो हि वा एतस्माद्वाजिनमपक्रामत्यथैष क्लैब्याद्बिभाय सोममेव वाजिनग्ग् स्वेन भागधेयेनोप धावति स एवाऽस्मिन्नृतो वाजिनं दधाति न क्लीबो भवति ब्राह्मणस्पत्यमेकादशकपालं निर्वपेद्ग्रामकामो [१८] ब्रह्मणस्पतिमेव स्वेन भागधेयेनोप धावति स एवाऽस्मै सजातान्प्र यच्छति ग्राम्येव भवति गणवती

याज्यानुवाक्ये भवतः सजातैरेवैनं गणवन्तं करोत्येतामेवनिर्वपेद्यः कामयेत ब्रह्मन्विशं वि नाशयेयमिति मारुती याज्यानुवाक्ये कुर्याद्ब्रह्मन्नेव विशं वि नाशयति॥[१९]

*तेजः समीची ब्रह्मवर्चस्येव ग्रामकामस्त्रिचत्वारिग्ंशच्च॥2.3.3॥*

अर्यम्णे चरुं निर्वपेथ्सुवर्गकामोऽसौ वा आदित्योऽर्यमाऽर्यमणमेव स्वेन भागधेयेनोप धावति स एवैनग्ं सुवर्गं लोकं गमयत्यर्यम्णे चरुं निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्युरित्यसौ वा आदित्योऽर्यमा यः खलु वै ददाति सोऽर्यमाऽर्यमणमेव स्वेन भागधेयेनोप धावति स एवा [२०] ऽस्मै दानकामाः प्रजाः करोति दानकामा अस्मै प्रजा भवन्त्यर्यम्णे चरुं निर्वपेद्यः कामयेत स्वस्ति जनतामियामित्यसौ वा आदित्योऽर्यमाऽर्यमणमेव स्वेन भागधेयेनोप धावति स एवैनं तद्गमयति यत्र जिगमिषतीन्द्रो वै देवानामानुजावर आसीथ्स प्रजापतिमुपाऽधावत्तस्मा एतमैन्द्रमानुषूकमेकादशकपालं न्नि– [२१] रवपत्तेनैवैनमग्रं देवतानां पर्यणयद्बुध्नवती अग्रवती याज्यानुवाक्ये अकरोद्बुध्नादेवैनमग्रं पर्यणयद्यो राजन्य आनुजावरः स्यात्तस्मा एतमैन्द्रमानुषूकमेकादशकपालं निर्वपेदिन्द्रमेव स्वेन भागधेयेनोप धावति स एवैनमग्रग्ं समानानां परि णयति बुध्नवती अग्रवती याज्यानुवाक्ये भवतो बुध्नादेवैनमग्रं [२२] परि णयत्यानुषूको भवत्येषा ह्येतस्य देवता य आनुजावरः समृद्ध्यै यो ब्राह्मण आनुजावरः स्यात्तस्मा एतं बार्हस्पत्यमानुषूकं चरुं निर्वपेद्बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवैनमग्रग्ं समानानां परि णयति बुध्नवती अग्रवती याज्यानुवाक्ये भवतो बुध्नादेवैनमग्रं परि णयत्यानुषूको भवत्येषा

ह्येतस्य देवता य आनुजावरः समृद्ध्यै॥[२३]

*एव निरग्रमेतस्य चत्वारि च॥2.3.4॥*

प्रजापतेस्त्रयस्त्रिग्ंशदुहितर आसन्ताः सोमाय राज्ञेऽददात्तासाग्ं रोहिणीमुपैत्ता ईर्ष्यन्तीः पुनरगच्छन्ता अन्वैत्ताः पुनरयाचत ता अस्मै न पुनरददाथ्सोऽब्रवीदृतममीष्व यथा समावच्छ उपैष्याम्यथ ते पुनर्दास्यामीति स ऋतमामीत्ता अस्मै पुनरददात्तासाग्ं रोहिणीमेवोपै- [२४] त्तं यक्ष्म आर्छद्राजानं यक्ष्म आरदिति तद्राजयक्ष्मस्य जन्म यत्पापीयानभवत्तत्पापयक्ष्मस्य यज्जायाभ्योऽविन्दत्तज्जायेन्यस्य य एवमेतेषां यक्ष्माणां जन्म वेद नैनमेते यक्ष्मा विन्दन्ति स एता एव नमस्यन्नुऽपाधावत्ता अब्रुवन्वरं वृणामहै समावच्छ एव न उपाय इति तस्मा एत- [२५] मादित्यं चरुं निरवपन्तेनैवैनं पापाथ्स्रामादमुञ्चन् यः पापयक्ष्मगृहीतः स्यात्तस्मा एतमादित्यं चरुं निर्वपेदादित्यानेव स्वेन भागधेयेनोप धावति त एवैनं पापाथ्स्रामान्मुञ्चन्त्यमावास्यायां निर्वपेदमुमेवैनमाप्यायमानमन्वा प्याययति नवोनवो भवति जायमान इति पुरोऽनुवाक्या भवत्यायुरेवाऽस्मिन्तया दधाति यमादित्या अग्ंशुमाप्याययन्तीति याज्यैवैनमेतया ऽऽप्याययति॥[२६]

*एवोपैतमस्मिन् त्रयोदश॥2.3.5॥*

प्रजापतिर्देवेभ्योऽन्नाद्यं व्यादिशथ्सोऽब्रवीद्यदिमान्लोकानभ्यतिरिच्यातै तन्ममाऽसदिति तदिमान्लोकानभ्यत्यरिच्यतेन्द्रग्ं राजानमिन्द्रमभिराजमिन्द्रग्ग् स्वराजानं ततो वै स इमान्लोकाग् स्त्रेधाऽदुहत्तत्त्रिधातोस्त्रिधातुत्वं यं कामयेताऽन्नादः स्यादिति तस्मा एतं

त्रिधातुं निर्वपेदिन्द्राय राज्ञे पुरोडाश- [२७] मेकादशकपालमिन्द्रायाऽधिराजायेन्द्राय स्वराज्ञेऽयं वा इन्द्रो राजाऽयमिन्द्रोऽधिराजोऽसाविन्द्रः स्वराडिमानेव लोकान्थ्स्वेन भागधेयेनोप धावति त एवाऽस्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति यथा वथ्सेन प्रत्तां गां दुह एवमेवेमान्लोकान्प्रत्तान्काममन्नाद्यं दुह उत्तानेषु कपालेष्वधि श्रयत्ययातयामत्वाय त्रयः पुरोडाशा भवन्ति त्रय इमे लोका एषां लोकानामाप्त्या उत्तर उत्तरो ज्यायान्भवत्येवमिव हीमे लोकाः समृद्ध्यै सर्वेषामभिगमयन्नव द्यत्यछं बट्कारं व्यत्यासमन्वाहानिर्दाहाय॥[२८]

*पुरोडाशं त्रयष्षड्विगं शतिश्च*||**2.3.6**||

देवासुराः संयत्ता आसन्तान्देवानसुरा अजयन्ते देवाः पराजिग्याना असुराणां वैश्यमुपाऽऽयन्तेभ्य इन्द्रियं वीर्यमपाऽक्रामत्तदिन्द्रोऽचायत्तदन्वपाऽक्रामत्तदवरुधं नाऽशक्नोत्तदस्मादभ्यर्धोऽचरथ्स प्रजापतिमुपाऽधावत्तमेतया सर्वपृष्ठयाऽयाजयत्तयैवाऽस्मिन्निन्द्रियं वीर्यमदधाद्य इन्द्रियकामो [२९] वीर्यकामः स्यात्तमेतया सर्वपृष्ठया याजयेदेता एव देवताः स्वेन भागधेयेनोप धावति ता एवाऽस्मिन्निन्द्रियं वीर्यं दधति यदिन्द्राय राथंतराय निर्वपति यदेवाऽग्नेस्तेजस्तदेवाऽव रुन्धे यदिन्द्राय बार्हतायय देवेन्द्रस्य तेजस्तदेवाऽव रुन्धे यदिन्द्राय वैरूपाय यदेव सवितुस्तेजस्त [३०] देवाऽव रुन्धे यदिन्द्राय वैराजाय यदेव धातुस्तेजस्तदेवाऽव रुन्धे यदिन्द्राय शाक्वराय यदेव मरुतां तेजस्तदेवाऽव रुन्धे यदिन्द्राय रैवताय यदेव बृहस्पतेस्तेजस्तदेवाव रुन्ध एतावन्ति वै तेजाग्ंसि तान्येवाव रुन्ध उत्तानेषु कपालेष्वधि श्रयत्ययातयामत्वाय द्वादशकपालः पुरोडाशो [३१] भवति वैश्वदेवत्वाय

समन्तं पर्यवद्यति समन्तमेवेन्द्रियं वीर्यं यजमाने दधाति व्यत्यासमन्वाहानिर्दहायाऽश्व ऋषभो वृष्णिर्बस्तः सा दक्षिणा वृषस्त्वायैतयैव यजेताऽभिशस्यमान एताश्चेद्वा अस्य देवता अन्नमदन्त्यदन्त्यु वेवाऽस्य मनुष्याः॥[३२]

*इन्द्रियकामः सवितुस्तेजस्तत्पुरोडाशोऽष्टात्रिगृंशच्च॥2.3.7॥*

रजनो वै कौणेयः क्रतुजितं जानकिं चक्षुर्वन्यमयात्तस्मा एतामिष्टिं निरवपदग्नये भ्राजस्वते पुरोडाशमष्टाकपालगृं सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालं तयैवाऽस्मिञ्चक्षुरदधाद्यश्चक्षुष्कामः स्यात्तस्मा एतामिष्टिं निर्वपेदग्नये भ्राजस्वते पुरोडाशमष्टाकपालगृं सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालमग्नेर्वै चक्षुषा मनुष्या वि [३३] पश्यन्ति सूर्यस्य देवा अग्निं चैव सूर्यं च स्वेन भागधेयेनोप धावति तावेवाऽस्मिञ्चक्षुर्धत्तश्चक्षुष्मानेव भवति यदाग्नेयौ भवतश्चक्षुषी एवाऽस्मिन्तत्प्रति दधाति यथ्सौर्यो नासिकां तेनाऽभितः सौर्यमाग्नेयौ भवतस्तस्मादभितो नासिकां चक्षुषी तस्मान्नासिकया चक्षुषी विधृते समानी याज्यानुवाक्ये भवतः समानगृं हि चक्षुः समृद्ध्या उदु त्यं जातवेदसगृं सप्त त्वा हरितो रथे चित्रं देवानामुदगादनीकमिति पिण्डान्प्र यच्छति चक्षुरेवाऽस्मै प्र यच्छति यदेव तस्य तत्॥[३४]

*वि ह्यष्टाविगृंशतिश्च॥2.3.8॥*

ध्रुवोऽसि ध्रुवोऽहगृं सजातेषु भूयासं धीरश्चेत्ता वसुविद्ध्रुवोऽसि ध्रुवोऽहगृं सजातेषु भूयासमुग्रश्चेत्ता वसुविद्ध्रुवोऽसि ध्रुवोऽहगृं सजातेषु भूयासमभिभूश्चेत्ता

वसुविदामनमस्यामनस्य देवा ये सजाताः कुमाराः समनसस्तानहं कामये हृदा ते मां कामयन्ताग्ं हृदा तान्म आमनसः कृधि स्वाहाऽऽमनम- [३५] स्यामनस्य देवा याः स्त्रियः समनसस्ता अहं कामये हृदा ता मां कामयन्ताग्ं हृदा ता म आमनसः कृधि स्वाहा वैश्वदेवीग्ं सां ग्रहणीं निर्वपेद्ग्रामकामो वैश्वदेवा वै सजाता विश्वानेव देवान्थ्स्वेन भागधेयेनोप धावति त एवाऽस्मै सजातान्प्र यच्छन्ति ग्राम्येव भवति सांग्रहणी भवति मनोग्रहणं वै संग्रहणं मन एव सजातानां [३६] गृह्णाति ध्रुवोऽसि ध्रुवोऽहग्ं सजातेषु भूयासमिति परिधीन्परि दधात्याशिषमेवैतामा शास्तेऽथो एतदेव सर्वग्ं सजातेष्वधि भवति यस्यैवं विदुष एते परिधयः परिधीयन्त आमनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोत्येतावन्तो वै सजाता ये महान्तो ये क्षुल्लका याः स्त्रियः तानेवाव रुन्धे त एनमवरुद्धा उप तिष्ठन्ते॥[३७]

*स्वाहाऽऽमनमसि सजातानाग्ं रुन्धे पञ्चच॥2.3.9॥*

यन्नवमैत्तन्नवनीतमभवद्यदसर्पत्तथ्सर्पिरभवद्यदध्रियत तद्धृतमभवदश्विनोः प्राणोऽसि तस्य ते दत्तां ययोः प्राणोऽसि स्वाहेन्द्रस्य प्राणोऽसि तस्य ते ददातु यस्य प्राणोऽसि स्वाहा मित्रावरुणयोः प्राणोऽसि तस्य ते दत्तां ययोः प्राणोऽसि स्वाहा विश्वेषां देवानां प्राणोऽसि [३८] तस्य ते ददतु येषां प्राणोऽसि स्वाहा घृतस्य धाराममृतस्य पन्थामिन्द्रेण दत्तां प्रयतां मरुद्भिः। तत्त्वा विष्णुः पर्यपश्यत्तत्त्वेडा गव्यैरयत्॥ पावमानेन त्वा स्तोमेन गायत्रस्य वर्तन्योपाग्ं शोर्वीर्येण देवस्त्वा सवितो- [३९] थ्सृजतु जीवातवे जीवनस्यायै बृहद्रथन्तरयोस्त्वा स्तोमेन त्रिष्टुभो वर्तन्या शुक्रस्य वीर्येण देवस्त्वा सवितोथ्सृजतु जीवातवे जीवनस्याया अग्नेस्त्वा मात्रया जगत्यै

वर्तन्याऽऽग्रयणस्य वीर्येण देवस्त्वा सवितोत्सृजतु जीवातवे जीवनस्याया इममग्न आयुषे वर्चसे कृधि प्रियग्ं रेतो वरुण सोम राजन्। मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथाऽसत्॥ अग्निरायुष्मान्थ्स वनस्पतिभिरायुष्मान्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि सोम आयुष्मान्थ्स ओषधीभिर्यज्ञ आयुष्मान्थ्स दक्षिणाभिर्ब्रह्माऽऽयुष्मत्तद्ब्राह्मणैरायुष्मद्देवा आयुष्मन्तस्तेऽमृतेन पितर आयुष्मन्तस्ते स्वधयाऽऽयुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि॥[४०]

*विश्वेषां देवानां प्राणोऽसि त्रिष्टुभो वर्तन्या श्रुक्रस्य वीर्येण देवस्त्वा सवितोत्सोम आयुष्मान्पङ्क्तिविग्ंशतिश्च*
**||2.3.10||**

अग्निं वा एतस्य शरीरं गच्छति सोमग्ं रसो वरुण एनं वरुणपाशेन गृह्णाति सरस्वतीं वागग्नाविष्णू आत्मा यस्य ज्योगामयति यो ज्योगामयावी स्याद्यो वा कामयेत सर्वमायुरियामिति तस्मा एतामिष्टिं निर्वपेदाग्नेयमष्टाकपालग्ं सौम्यं चरुं वारुणं दशकपालग्ं सारस्वतं चरुमाग्नावैष्णवमेकादशकपालमग्नेरेवास्य शरीरं निष्क्रीणाति सोमाद्रसं [४१] वारुणेनैवैनं वरुणपाशान्मुञ्चति सारस्वतेन वाचं दधात्यग्निः सर्वा देवता विष्णुर्यज्ञो देवताभिश्चैवैनं यज्ञेन च भिषज्यत्युत यदीतासुर्भवति जीवत्येव यन्नवमैत्तन्नवनीतमभवदित्याज्यमवेक्षते रूपमेवाऽस्यैतन्महिमानं व्याचष्टेऽश्विनोः प्राणोऽसीत्याहाऽश्विनौ वै देवानां [४२] भिषजौ ताभ्यामेवाऽस्मै भेषजं करोतीन्द्रस्य प्राणोऽसीत्याहेन्द्रियमेवाऽस्मिन्नेतेन दधाति मित्रावरुणयोः प्राणोऽसीत्याह प्राणापानावेवाऽस्मिन्नेतेन दधाति विश्वेषां देवानां प्राणोऽसीत्याह वीर्यमेवाऽस्मिन्नेतेन दधाति घृतस्य धारामृतस्य

पन्थामित्याह यथायजुरेवैतत्पावमानेन त्वा स्तोमेनेत्या- [४३] ह प्राणमेवाऽस्मिन्नेतेन दधाति बृहद्रथन्तरयोस्त्वा स्तोमेनेत्याहौज एवाऽस्मिन्नेतेन दधात्यग्नेस्त्वा मात्रयेत्याहाऽऽत्मानमेवाऽस्मिन्नेतेन दधात्यृत्विजः पर्याहुर्यावन्त एवर्त्विजस्त एनं भिषज्यन्ति ब्रह्मणो हस्तमन्वारभ्य पर्याहुरेकधैव यजमान आयुर्दधति यदेव तस्य तद्धिरण्या [४४] द्धृतं निष्पिबत्यायुर्वै घृतममृतग्ं हिरण्यममृतादेवाऽऽयुर्निष्पिबति शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यथो खलु यावतीः समा एष्यन्मन्येत तावन्मानग्ग् स्याथ्समृद्ध्या इममग्न आयुषे वर्चसे कृधीत्याहाऽऽयुरेवाऽस्मिन्वर्चो दधाति विश्वे देवा जरदष्टिर्यथाऽसदित्याह जरदष्टिमेवैनं करोत्यग्निरायुष्मानिति हस्तं गृह्णात्येते वै देवा आयुष्मन्तस्त एवाऽस्मिन्नायुर्दधति सर्वमायुरेति॥[४५]

*रसं देवानाग् स्तोमेनेति हिरण्यादसदिति द्वाविग्ंशतिश्च॥**2.3.11***॥

प्रजापतिर्वरुणायाऽश्वमनयथ्स स्वां देवतामार्छथ्स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत्तं निरवपत्ततो वै स वरुणपाशादमुच्यत वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति यावतोऽश्वान् प्रतिगृह्णीयात्तावतो वारुणाञ्चतुष्कपालान्निर्वपेद्वरुणमेव स्वेन भागधेयेनोप धावति स एवैनं वरुणपाशान्मुञ्चति [४६] चतुष्कपाला भवन्ति चतुष्पाद्ध्यश्वः समृद्ध्या एकमतिरिक्तं निर्वपेद्यमेव प्रतिग्राही भवति यं वा नाऽध्येति तस्मादेव वरुणपाशान्मुच्यते यद्यपरं प्रतिग्राही स्याथ्सौर्यमेककपालमनु निर्वपेदमुमेवाऽऽदित्यमुच्चारं कुरुतेऽपोऽवभृथमवैत्यप्सु वै वरुणः साक्षादेव वरुणमव

यजतेऽपोनप्त्रीयं चरुं पुनरेत्य निर्वपेदप्सुयोनिर्वा अश्वः स्वामेवैनं योनिं गमयति स एनग्ं शान्त उप तिष्ठते॥[४७]

*मुञ्चति चरुग्ं सप्तदश च॥2.3.12॥*

या वामिन्द्रावरुणा यतव्या तनूस्तयेममग्ंहसो मुञ्चतं या वामिन्द्रावरुणा सहस्या रक्षस्या तेजस्या तनूस्तयेममग्ंहसो मुञ्चतं यो वामिन्द्रावरुणावग्नौ स्रामस्तं वामेतेनाव यजे यो वामिन्द्रावरुणा द्विपाथ्सु पशुषु चतुष्पाथ्सु गोष्ठे गृहेष्वप्स्वोषधीषु वनस्पतिषु स्रामस्तं वामेतेनाऽव यज इन्द्रो वा एतस्ये- [४८] न्द्रियेणाऽप क्रामति वरुण एनं वरुणपाशेन गृह्णाति यः पाप्मना गृहीतो भवति यः पाप्मना गृहीतः स्यात्तस्मा एतामैन्द्रावरुणीं पयस्यां निर्वपेदिन्द्र एवाऽस्मिन्निन्द्रियं दधाति वरुण एनं वरुणपाशान्मुञ्चति पयस्या भवति पयो हि वा एतस्मादपक्रामत्यथैष पाप्मना गृहीतो यत्पयस्या भवति पय एवाऽस्मिन्तया दधाति पयस्यायां [४९] पुरोडाशमव दधात्यात्मन्वन्तमेवैनं करोत्यथो आयतनवन्तमेव चतुर्धा व्यूहति दिक्ष्वेव प्रति तिष्ठति पुनः समूहति दिग्भ्य एवाऽस्मै भेषजं करोति समूह्यावद्यति यथाऽऽविद्धं निष्कृन्तति तादृगेव तद्यो वामिन्द्रावरुणावग्नौ स्रामस्तं वामेतेनाऽव यज इत्याह दुरिष्ट्या एवैनं पाति यो वामिन्द्रावरुणा द्विपाथ्सु पशुषु स्रामस्तं वामेतेनाऽव यज इत्याहैतावतीर्वा आप ओषधयो वनस्पतयः प्रजाः पशव उपजीवनीयास्ता एवाऽस्मै वरुणपाशान्मुञ्चति॥[५०]

*एतस्य पयस्यायां पाति षड्विग्ंशतिश्च॥2.3.13॥*

स प्रत्नवन्नि काव्येन्द्रं वो विश्वतस्परीन्द्रं नरः। त्वं नः सोम विश्वतो रक्षा राजन्नघायतः। न रिष्येत्त्वावतः सखा॥ या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु। तेभिर्नो विश्वैः सुमना अहेडन्राजन्त्सोम प्रति हव्या गृभाय॥ अग्नीषोमा सवेदसा सहूती वनतं गिरः। सं देवत्रा बभूवथुः॥ युव [५१] मेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम्। युवग्ं सिन्धूग्ं रभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतान्॥ अग्नीषोमाविमग्ं सु मे शृणुतं वृषणा हवम्। प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः॥ आऽन्यं दिवो मातरिश्वा जभाराऽमथ्नादन्यं परि श्येनो अद्रेः। अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकम्॥ अग्नीषोमा हविषः प्रस्थितस्य वीतग्ं [५२] हर्यतं वृषणा जुषेथाम्। सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः॥ आ प्यायस्व सं ते॥ गणानां त्वा गणपतिग्ं हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम्॥ स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः। देवानां यः पितरमाविवासति [५३] श्रद्धामना हविषा ब्रह्मणस्पतिम्॥ स सुष्टुभा स ऋक्वता गणेन वलग्ं रुरोज फलिगग्ं रवेण। बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत्॥ मरुतो यद्ध वो दिवो या वः शर्म॥ अर्यमाऽऽ याति वृषभस्तुविष्मान्दाता वसूनां पुरुहूतो अर्हन्न्। सहस्राक्षो गोत्रभिद्वज्रबाहुरस्मासु देवो द्रविणं दधातु॥ ये तेऽर्यमन्बहवो देवयानाः पन्थानो [५४] राजन्दिव आचरन्ति। तेभिर्नो देव महि शर्म यच्छ शं न एधि द्विपदे शं चतुष्पदे॥ बुध्नादग्रमङ्गिरोभिर्गृणानो वि पर्वतस्य दृग्ंहितान्यैरत्। रुजद्रोधाग्ंसि कृत्रिमाण्येषाग्ं सोमस्य ता मद इन्द्रश्चकार॥ बुध्नादग्रेण वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनाम्।

वृथाऽसृजत्पथिभिर्दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार।[५५] प्र यो जज्ञे विद्वाग्ं अस्य बन्धुं विश्वानि देवो जनिमा विवक्ति। ब्रह्म ब्रह्मण उज्जभार मध्यान्नीचादुच्चा स्वधयाऽभि प्र तस्थौ॥ महान्मही अस्तभायद्वि जातो द्याग्ं सद्म पार्थिवं च रजः। स बुध्नादाष्ट जनुषाऽभ्यग्रं बृहस्पतिर्देवता यस्य सम्राट्॥ बुध्नाद्यो अग्रमभ्यर्त्योजसा बृहस्पतिमा विवासन्ति देवाः। भिनद्बलं वि पुरो दर्दरीति कनिक्रदथ्सुवरपो जिगाय॥ [५६]

*युवं वीतमाविवासति पन्थानो दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार देवा नव च॥**2.3.14**॥*

*आदित्येभ्यो देवा वै मृत्योर्देवा वै सत्रमर्यम्णो प्रजापतेस्त्रयस्त्रिग्ं शत्प्रजापतिर्देवेभ्योऽन्नाद्यं देवासुरास्तान्त्रजनोधुवोऽसि यन्नवमैदग्निं वैप्रजापतिर्वरुणाय यावामिन्द्रावरुणा स प्रन्नवच्चतुर्दश॥१४॥*

*आदित्येभ्यस्त्वष्टुरस्मै दानकामा एवाऽव रुन्धेऽग्निं वै स प्रन्नवथ्षट्पञ्चाशत्॥**56**॥*

*आदित्येभ्यः सुवरपो जिगाय॥*

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति द्वितीयकाण्डे तृतीयः प्रश्नः॥